## CBSE CLASS 10 – SANSKRIT Qs PAPER 2025_26

**SET - 1**

**Series JMS/5**

Code No. **2/4/10**

Roll No. | | | | | | | |

Candidates must write the Code on the title page of the answer-book

**सामान्यनिर्देशाः-**

**अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।**

- 'क' खण्डः : अपठितावबोधनम् (10 अङ्काः)
- 'ख' खण्डः : रचनात्मककार्यम् (15 अङ्काः)
- 'ग' खण्डः : अनुप्रयुक्तव्याकरणम् (25 अङ्काः)
- 'घ' खण्डः : पठितावबोधनम् (30 अङ्काः)

❖ प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

❖ उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः

❖ प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।

❖ सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

# SANSKRIT (112)

*Time allowed : 3 hours* *Maximum Marks : 80*

## खंडः 'क' (अपठितावबोधनम्) (10 अङ्काः)

**प्रश्न 1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। (10)**

**(निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)**

अस्माकम् उपरि वर्तते विशाल आकाशः। आकाशस्य अन्तः न अस्ति। अतः आकाशम् अनन्तम् अपि वदन्ति। तत्र असङ्ख्यानि नक्षत्राणि सन्ति। आकाशे सूर्य, चन्द्र, भौमः, बुध, गुरु, शुक्र, शनिः च सप्त ग्रहाः सन्ति। निशायां चन्द्रस्य उदयः भवति। तस्य प्रकाशः शीतलः अस्ति। सः सूर्यात् प्रकाशं विन्दति। पूर्णिमायां चन्द्रस्य बिम्बं वर्तुलं भवति। क्रमेण तत् क्षयति। अमावस्याम् आकाशे तस्य अंशः अपि न भवति। शुक्लपक्षे चन्द्रः क्रमेण वृद्धिं गच्छति कृष्णपक्षे क्रमेण क्षयति च। जनाः चन्द्रस्य प्रकाशं ज्योत्स्नां चन्द्रिकां इति च वदन्ति। चन्द्रस्य विधुः सुधाकरः, औषधीशः, निशापतिः च इति अनेकानि अभिधानानि सन्ति। रात्रौ आकाशे ताराः दिव्यन्ति। ते अस्मत् अति दूरे सन्ति।

**I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) (एक पद में उत्तर दीजिए।) (केवल दो प्रश्न) (1 × 2 = 2)**

(i) आकाशस्य किं नास्ति?
(ii) चन्द्रस्य उदयः कदा भवति?
(iii) आकाशं किं वदन्ति?

**II. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) (पूर्ण वाक्य में उत्तर दीजिए।) (केवल दो प्रश्न) (2 × 2 = 4)**

(i) अस्माकम् उपरि कः वर्तते?
(ii) चन्द्रस्य प्रकाशं किं वदन्ति?
(iii) आकाशे असङ्ख्यानि किं सन्ति?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। (1 × 1 = 1)**
**(इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए।)**

**IV. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।) (1 × 3 = 3)**

(i) 'ग्रहाः' इति पदस्य विशेषणं गद्यांशात् चित्वा लिखत।

(क) शनि (ख) सप्त (ग) सूर्य (घ) आकाशे

(ii) 'दिवसे' इति पदस्य विलोमपदं किम्?

(क) दिनम् (ख) अमावस्यायाम् (ग) चन्द्रिकां (घ) निशायां

(iii) "ते अस्मत् अति दूरे सन्ति।" अत्र सन्ति' क्रियापदस्य कर्तृपदं किम्?

(क) कोऽपि (ख) ते (ग) अति दूरं (घ)अस्मत्

## खंडः 'ख' (रचनात्मकं-कार्यम्) (15 अङ्काः)

**प्रश्न 2. (अ) भवान् रोहितः। स्वमित्रम् अङ्कुरः पशुपक्षिभिः सह क्रूरव्यवहारात् निषेधयितुं लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः सहायतया लिखत।** **(5 अङ्काः)**

(आप रोहित हैं, अपने मित्र अंकुर को पशु-पक्षियों के साथ हो रहे क्रूर व्यवहार को रोकने के लिए मंजूषा में दिए गए शब्दों की सहायता से पत्र लिखिए।)

**मञ्जूषा** – पशुपक्षिभ्यः प्रथमस्थानम्, मयूराष्ट्रतः सम्भाषणं, विज्ञाय, शोभां अङ्कुरः, जन्तुशालायामपि यथायोग्यं, रोहितः।

**अथवा**

**(आ) भवान् राजकीय आदर्श उच्च माध्यमिक विद्यालय कञ्चनपुरस्य दशम्याः कक्षायाः छात्रः सोमनाथः अस्ति। स्वविद्यालयस्य प्रधानाचार्यः आवश्यक कार्यवशात् पञ्चदिनस्य अवकाशार्थं मञ्जूषायां प्रदत्तशब्दैः सहायतया प्रार्थना-पत्र लिखत।**

(आप राजकीय आदर्श उच्च माध्यमिक विद्यालय कंचनपुर की दसवीं कक्षा के छात्र सोमनाथ हैं। अपने विद्यालय के प्रधानाचार्य को आवश्यक कार्यवश पाँच दिनों के अवकाश के लिए मंजूषा में दिए गए शब्दों की सहायता से प्रार्थना-पत्र लिखिए।)

**मञ्जूषा** – श्रीमन्तः प्रार्थना-पत्रम्, भवताम्, यत् वर्तते, मम, सोमनाथः आगन्तुं सेवायाम्, दशमी।

**प्रश्न 3. (अ) प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत। (1 × 5 = 5)**
**(दिए गए चित्र को देखकर मञ्जूषा में दिए गए शब्दों की सहायता से पाँच वाक्य संस्कृत में लिखिए।)**



**मञ्जूषा** – वृक्षेषु, मण्डूकः, तिस्रः, जलगर्तस्य, नृत्यति, इन्द्रधनुषः, दोलाभिः, टर्-टर्र इति शब्दम्, श्रावणमासस्य, वर्षायाः, अनुभवन्ति, कुर्वन्ति।

**अथवा**

**(आ) अधोलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतेवाक्यैः एकम् अनुच्छेदं लिखत।**

(निम्नलिखित विषय पर आधारित मंजूषा में दिए गए शब्दों की सहायता से कम-से-कम पाँच संस्कृत वाक्यों में एक अनुच्छेद लिखिए।)

**'भारतदेशं' (भारत देश)**

**मञ्जूषा** – प्रतिवसन्ति प्राचीनदेशः कर्त्तव्यम्, एकसूत्रबद्धाः, विविधानि दर्शयन्ति आचाराः विचाराः सर्वे, सुदृढ़ प्रतिरूपेण, अत्र, बहुविधा, अनेकाः एकः भाषाः, मतयुक्ताः, निवसन्ति धर्माः जनाः, सांस्कृतिक एकता प्रतिरूपेण प्रतिवसन्ति भारतीयः वयं प्रथमम् भावना, अस्माभिः देशं गर्व, भारतः अस्ति स्म, भारतं।

**प्रश्न 4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत।** **(1 × 5 = 5)**

**(निम्नलिखित वाक्यों का संस्कृत भाषा में अनुवाद करके लिखिए।)**

| | |
|---|---|
| (i) राम सिंह से डरता है। | Ram fears from the lion. |
| (ii) वह बाजार से फल लाता है। | He brings fruit from market. |
| (iii) सुरेश वृक्ष के नीचे सोता है। | Suresh sleeps under the tree. |
| (iv) गीता पाठ पढ़ो। | Geeta study the lesson. |
| (v) मैं गाँव जाऊँगा। | I will go to the village. |

## खंडः 'ग' (अनुप्रयुक्त-व्याकरणम्) (25 अङ्काः)

**प्रश्न 5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धि / सन्धि-विच्छेदं वा कुरु।** **(1×4= 4)**

**(निम्नलिखित वाक्यों में रेखांकित शब्दों की संधि अथवा संधि-विच्छेद कीजिए।)**

(अ) (i) **जगत् + नाथः** चतुर्भुजो अस्ति।

(ii) **धनञ्च** सर्व लभे।

(iii) **तत् + श्रुत्वा** सः धावति।

(iv) **कश्चित्** जनः शनैः चलति।

**अथवा**

(आ) (i) छात्र **निर्बलः** अस्ति।

(ii) सर्वथा **सम्यगुक्तंम्** सिंहमहोदयेन।

(iii) अपूर्वोऽयं मानवानां **सरस्वति + अवतारः**।

(iv) त्वया महत्कौतुकम् आवेदितं **यत् + मानुषात् + अपि** विभेषि।

**प्रश्न 6.अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं, समास विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **(1×4 = 4)**

**(निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा समास-विग्रह दिए गए विकल्पों में से चुनकर लिखिए।)**

(i) द्रोणपुत्रः अश्वत्थामा आसीत्।

(क) द्रोणस्य पुत्रः (ख) द्रोणाय पुत्रः (ग) द्रोणात् पुत्रः (घ) द्रोणि पुत्रः

(ii) का सुखदा? साधुजन मैत्री।

(क) सुखस्य दात्री (ख) सुखं ददाति सा (ग) सुखः ददाति (घ) सुखं ददाति

(iii) सः कृष्णभक्तः अस्ति।

(क) कृष्णस्य भक्तः (ख) कृष्णम् भक्तः (ग) कृष्णाय भक्तः (घ) कृष्णात् भक्तः

(iv) शरणागतस्य रक्षां कुरु।

(क) शरणम् आगतस्य (ख) शरणा + आगतस्य (ग) शरणाम आगता (घ) शरण आगतस्य

**प्रश्न 7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।** **(1 × 4 = 4)**

**(निम्नलिखित वाक्यों में रेखांकित पदों के प्रकृति-प्रत्ययों को जोड़कर अथवा अलग करके उचित उत्तर विकल्पों में से चुनकर लिखिए।)**

(i) श्रद्धा + मतुप् ज्ञानं लभते।

(क) श्रद्धावान् (ख) शृद्धवानम् (ग) श्रद्धायामं (घ) श्रद्धवान्

(ii) मनुष्य जीवने परिश्रमस्य महत्त्वं भवति।

(क) महतवं + त्वं (ख) महत् + त्व (ग) महता + त्व (घ) महानता + त्व

(iii) सीता मधुरा कवि + तल् गायति।

(क) कवि (ख) कवितम् (ग) कविता (घ) कवित्वम्

(iv) बालिकया माता चतुर + टाप् अस्ति।

(क) चतुरतमा (ख) चतुरतरा (ग) चतुरता (घ) चतुरा

**प्रश्न 8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत।** **(1 × 3 = 3)**

**(वाच्य के अनुसार उचित पद से रिक्त स्थानों की पूर्ति करके निम्नलिखित संवाद को पुनः लिखिए।)**

(i) रमा सीते! त्वया कुत्र ________________ ? (गम्)

(क) गम्यते (ख) गम्येते (ग) गम्यन्ते (घ) गमिष्यामि

(ii) सीता रमे! मया ________________ गम्यते। (विद्यालय)

(क) विद्यालयात् (ख) विद्यालयं (ग) विद्यालयः (घ) विद्यालयाव

(iii) रमा किं त्वं तत्र संस्कृतं ________________ ? (पठ्)

(क) पठन्ति (ख) पठति (ग) पठसि (घ) पठतः

**प्रश्न 9. कालबोधकशब्दैः अधोलिखितं दिनचर्यां पूरयत।** **(1 × 4 = 4)**

**(कालबोधक शब्दों से निम्नलिखित दिनचर्या को पूरा कीजिए।)**

(i) मैट्रोरेलयानं (9:00) ________________ प्रातः शहादरा मैट्रोरेलस्थाने तिष्ठति।

(ii) एतत् (9:15) ________________ कश्मीरीगेट आगच्छति।

(iii) एतत् (9:30) ________________ तीसहजार्याम् आगच्छति।

(iv) एतत् (11:45) ________________ रिठालारेलयानस्थाने आगमिष्यति।

**प्रश्न 10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत।** **(1 × 3 = 3)**

**(मंजूषा में दिए गए उचित अव्यय पदों से निम्नलिखित वाक्यों के रिक्त स्थानों की पूर्ति कीजिए।)**

**मञ्जूषा** – वृथा, अधुना, पुरा।

(i) जनानां समृद्धिः ________________ संवर्धिता वर्तते।

(ii) यात्रायां ________________ कोलाहलं न कर्त्तव्यम्।

(iii) ________________ भारतम् अतीव समृद्धम् आसीत्।

**प्रश्न 11. अधोलिखितवाक्येषु रेखाङ्कित अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत।** **(1 × 3 = 3)**

**(निम्नलिखित वाक्यों में रेखांकित अशुद्ध पद के लिए उचित पद चुनकर वाक्यों को पुनः लिखिए।)**

(i) तत्र <u>तिस्रः</u> फलानि सन्ति।

(क) त्रयः (ख) त्रीन् (ग) त्रीणि (घ) त्रिभिः

(ii) <u>तौ</u> बालिके क्रीडतः।

(क) सा (ख) ताः (ग) ते (घ) तौ

(iii) त्वया सह <u>के</u> गच्छति।

(क) किम् (ख) कम् (ग) कः (घ) केन

## खंडः 'घ' (पठितावबोधनम्) (30 अङ्काः)

**प्रश्न 12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। (5 अङ्काः)**
**(निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)**

"बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मि पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति। सुरभि वचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयभद्रवत्। स च तामेवमसान्त्यत् गच्छ वत्से! सर्वं भद्रं जायेत। अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समाजायत। पश्यतः एव सर्वत्र जलोपप्लवः सञ्जातः। कृषकः हर्षातिरेकेण कर्षणविमुखः सन् वृषभौ नीत्वा गृहमगात्।

**I. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) (एक पद में उत्तर दीजिए।) (केवल दो प्रश्न)** **(1/2 × 2 = 1)**

(i) कस्मिन् सुते मातुः अभ्यधिका कृपा भवति?

(ii) पश्यतः एव सर्वत्र किम् सञ्जातः?

(iii) चण्डवातेन मेघरवैश्च सह कः समजायत?

**II. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) (पूर्ण वाक्य में उत्तर दीजिए।) (केवल दो प्रश्न)** **(1 × 2 = 2)**

(i) सुरभि वचनं श्रुत्वा इन्द्रः (सः) किम् अवदत्?

(ii) वृषभौ नीत्वा कः गृहमगात्?

(iii) सा पुत्रस्य प्रति कीदृशं प्रेमं करोति?

**III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)** **(1 × 2 = 2)**

(अ) (i) 'कल्याणं' पदस्य पर्यायपदं गद्यांशे किम् अस्ति?

(ii) 'दुर्बले सुते' अत्र विशेष्यपदं गद्यांशे किम् अस्ति?

**अथवा**

(आ) (i) स च तामेवमसान्त्यत्' अत्र क्रियापदं किमस्ति?

(ii) 'सर्वेस्वपत्येषु' पदस्य सन्धि-विच्छेदं कुरुत।

**प्रश्न 13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **(5 अङ्काः)**
**(निम्नलिखित पद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)**

**सेवितव्यो महावृक्षः फलच्छाया समन्वितः।**
**यदि देवात् फलं नास्ति छाया केन निवार्यते।।**

**I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** (एक पद में उत्तर दीजिए।) (केवल दो प्रश्न) **(1/2× 2 = 1 अङ्कः)**

(i) देवात् किम् नास्ति?

(ii) कः सेवितव्यः?

(iii) कस्मात् फलं नास्ति?

**II. पूर्ण वाक्येन उत्तरत (केवलं प्रश्नद्वयम्) (पूर्ण वाक्य में उत्तर दीजिए।) (केवल दो प्रश्न)** **(1 × 2 = 2)**

(i) कीदृश: वृक्षः सेवितव्यः?

(ii) वृक्षस्य का न निवार्यते?

(iii) महावृक्षस्य किम् कर्त्तव्यम्?

**III. निर्देशानुसारम् उत्तरत।(निर्देशानुसार उत्तर दीजिए।)** **(1 × 2 = 2)**

(अ) (i) 'महान् वृक्षः' अत्र विशेषणपदं किम् अस्ति।

(ii) 'भाग्यवशात्' पदस्य पर्यायपदं श्लोके किम् अस्ति?

**अथवा**

(आ) (i) 'अस्ति' पदस्य विलोम पदं पद्यांशे किम्?

(ii) 'देवात्' पदे का विभक्ति?

**प्रश्न 14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। (5 अङ्काः)**

**(निम्नलिखित नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)**

**रामः** - एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि क्षत्रियकुल-पितामहयोः सूर्यचन्द्रयोः को वा भवतोवंशस्य कर्त्ता?

**लवः -** भगवन् सहस्त्रदीधितिः।

**रामः -** कथमस्मत्समानाभिजनौ संवृतौ?

**विदूषकः** - किं द्वयोरप्येकमेव प्रतिवचनम्?

**लवः** - भ्रातरावावां सोदर्यौ।

**रामः -** समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

**लवः**- आवां यमलौ।

**I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) (एक पद में उत्तर दीजिए।) (केवल दो प्रश्न)** **(1/2 × 2 = 1)**

(i) आवां यमलौ कः कथयति?

(ii) भगवन् कः अस्ति?

(iii) कुशलवयोः वंशस्य कर्त्ता कः?

**II. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) (पूर्ण वाक्य में उत्तर दीजिए।) (केवल दो प्रश्न)** **(1 × 2 = 2)**

(i) रामः किमर्थं तयोः कुल विषये पृच्छति?

(ii) कुशलवा कीदृशौ भ्रातरौ आस्ताम्?

(iii) रामः लवकुश किम् पृच्छति?

**III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।) (1 × 2 = 2)**

(अ) (i) अत्र 'युगलौ' पदस्य पर्यायपदं नाट्यांशे किम् अस्ति?

(ii) 'कौतूहलेन पृच्छामि' अत्र क्रियापदं किम् अस्ति?

**अथवा**

(आ) (i) 'सोदर्यौ' इति विशेष्यपदं किम्?

(ii) 'भ्रातरावावा' पदस्य सन्धि-विच्छेदं कुरुत?

**प्रश्न 15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए।)** **(1 × 4 = 4)**

(i) अतः निजकृत्यस्य फलं भुङ्क्ष्व।

(ii) त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे।

(iii) तस्य मृतशरीरं राजमार्ग निकषा वर्तते।

(iv) आरक्षी तं न्यायालयं नीतवान्।

(iv) आरक्षी तं कुत्र नीतवान्?

(v) निर्धनः जनः कं द्रष्टुं प्रस्थितः?

**प्रश्न 16. (अ) मञ्जूषातः समुचितपदानि चित्वा अधोलिखित श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत।** **(1 × 4 = 4)**

**(मंजूषा से उचित पदों को चुनकर निम्नलिखित श्लोकों के अन्वय को पूरा करके पुनः लिखिए।)**

**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**
**परित्यज्य फलं पक्कं भुङ्क्तेऽपक्कं विमूढधीः॥**

**अन्वयः** - यः (i) ________________ वाचं त्यक्त्वा परुषामं वाचम् (ii) ________________ (स) विमूढधीः

पक्कम् (फलम्) (iii) ________________ अपक्कम् फलम् (iv) ________________।

**मञ्जूषा** – अभ्युदीरयेत्, भुङ्क्ते, धर्मप्रदाम्, परित्यज्य।

**अथवा**

**(आ) मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत।**

**(मंजूषा की सहायता से श्लोक के भावार्थ से रिक्त स्थानों को पूरा करके पुन: लिखिए।)**

**कञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम्**
**प्रपश्यामि ग्रामान्ते निर्झर-नदी-पयः पूरम्**
**एकान्ते कान्तारे क्षणमपि में स्यात् सञ्चरणम्।**
**शुचि …….।**

**भावार्थः -** कञ्चित् (i) ________________ माम् अस्मात् नगरात् बहुदूरम् (ii) ________________। ग्रामान्ते पयः

पूरं (iii) ________________ प्रदीम् प्रपश्यामि । एकान्ते कान्तारे क्षणमपि में सञ्चरणम् (iv) ___________

________________ पर्यावरणं शुचि ….।

**मञ्जूषा** – स्यात् कालं निर्झर, नय।

**प्रश्न 17. अधोलिखितं कथांशं समुचित क्रमेण लिखत।** **(1/2 × 8 = 4)**

**(निम्नलिखित कथांश को उचित क्रम में लिखिए।)**

(i) सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्।

(ii) अयि शुभे! किमेवं रोदिषि? उच्यताम्।

(iii) भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभे अश्रूणि आविसारन्।

(iv) क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत्।

(v) सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात।

(vi) कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत।

(vii) तयोः बलिवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्।

(viii) कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्।

**प्रश्न 18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत।** **(1 × 3 = 3)**

**(निम्नलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुकूल उचित अर्थ चुनकर लिखिए।)**

(i) <u>सरसः</u> शोभा राजहंसेन भवति।

(क) निर्झरः (ख) तडागः (ग) नदी (घ) समुद्रः

(ii) अम्भोदाः <u>गगने</u> सन्ति।

(क) वने (ख) पर्वते (ग) नभे (घ) नगरे

(iii) बुद्धिमती गहन <u>कानने</u> व्याघ्रम् ददर्श?

(क) पर्वते (ख) जले (ग) नगरे (घ) वने

**ALL THE BEST**

EDUTECH ACADEMY
NURTURING THE FUTURE....
— SCHOOL SECTION —

CIDCO BRANCH
9168 444 999
1ST FLOOR, INFRONT OF BALIRAM PATIL SCHOOL
HARSUL-SAWANGI BRANCH
9168 044 999
1ST FLOOR, INFRONT OF PANAD SUPER MARKET